ज्ञातं पदं ताद्रूप्येण गोशाब्दत्वावच्छिन्नं प्रत्येव हेतुरतोगो-
त्वशक्तिग्रहान्न गोत्वेन गवयादेः न वा द्रव्यत्वादिना गोर-
न्वयधियोऽतिप्रसङ्गः । नचैवं जातेरिव व्यक्तेरपि शक्य-
त्वमावश्यकं न हि गवादिपदस्य शक्यत्वं जन्यत्वमपि तु
जन्यशाब्दधीविषयत्वं तच्च गोत्वस्येव गोरप्यविशिष्टमिति
वाच्यं गवादिपदधर्म्मिकस्वशक्तताज्ञानत्वावच्छिन्नशाब्दधी-
जनकतावच्छेदकत्वेन गोत्वादेरेव गवादिपदशक्यत्वात्
गोत्वशक्ततापेक्षया गोशक्तत्वस्य गुरुतया तज्ज्ञानत्वस्य
शाब्दं प्रति जगकतानवच्छेदकत्वात् । अतएवान्वय-
बुद्धेरात्मस्वात्मत्वाद्यवगाहित्वेऽपि न तेषां पदशक्य-
त्वम् । अस्तु वा गोत्वादिशक्तत्वेन ज्ञातं पदं गोत्वा-
दिशाब्दत्वावच्छिन्नं प्रत्येव हेतुर्व्विशेष्यतया तादृशशाब्दं
प्रति समवायेन गोत्वस्य नियामकत्वकल्पनाच्च नातिप्रसङ्गः
गोत्वादिना गवादेरिव गवयादेर्गोत्वादिनान्वयबोधत्वाव-
च्छिन्नं प्रत्यपि विनिगमकाभावेन गोत्वादिशक्तिज्ञानत्वेन
हेतुत्वमपेक्ष्य गोत्वशाब्दत्वावच्छिन्नं प्रत्येव गोत्वस्य तच्छक्त-
त्वज्ञानस्य च द्वयोः कारणतायामेव लाघवात् वस्तुतो-
गोत्वशाब्दं प्रति गोत्वशक्तिज्ञानमेव हेतुर्नतु गोत्वमपि
जातिव्यक्त्योस्तुल्यवित्तिवेद्यत्वनियमादेव गोव्यक्तीनान्त-
द्विषयत्वसिद्धेः प्रमाणविरहादेव गोत्वादिना गवयादि-
विषयत्वस्य तत्रासिद्धेश्च । यद्यपि जातेर्व्विषयत्वं
तत्समवायिव्यक्तिविषतया निरूपितमिति न व्याप्तिर्गो-
त्वाद्यालोचने कालोगोत्ववानित्यादिबोधे च व्यभिचारात्
नापि जातेर्निरवच्छिन्नप्रकारतायास्तथात्वनियमः गौरयमि-
त्यादिज्ञानस्य प्रत्यक्षे गोत्वेनेमं जानामीत्याकारे तथात्वा
त्तथाप्यन्वयबोधस्य निरवच्छिन्नगोत्वादिप्रकारत्वं गवादि-
विशेष्यतानिरूपितमेवेति व्याप्तिस्तादृशविशेष्यताकत्वं
विना शुद्धस्य गोत्वादेरन्वयबोधेनास्पर्शनात् गुरूणां गोत्वेन
गवयादिबोधस्यालीकत्वात् । अतएव गवाद्यंशे गोत्वादि-
प्रकारकबोधः समवायेनेव सम्बन्धान्तरेणापि तत्प्रकारकः
स्याद्गोत्वप्रकारतायां गोविशेष्यताकत्वस्येव समवायावच्छिन्न-
त्वस्यापि व्याप्तिबलेन सिद्धावपि सम्बन्धान्तरावच्छिन्नत्वस्य
प्रमाणविरहेणासिद्धेः । एवञ्च गोत्वादिशक्तिज्ञानत्वेन
जनकतायां विषयतावच्छेदकत्वाद्गोत्वादेरेव गवादिपद-
स्यार्थः गवादौ तद्व्यवहारस्तु तादृशावच्छेदकधर्म्मवत्त्व-
प्रयुक्तोगौणः । नचैवं गम्यादिधातोरपि गत्यादौ
शक्तिर्न स्याद्गतित्वादिशक्तिज्ञानादेव ताद्रूप्येण गत्यादेर्गम्या-
दिधातुतोबोधसम्भवादिति वाच्यं गुरूणां गतित्वादेः
संस्थानाव्यङ्ग्यत्वेन जातित्वासम्भवात् उत्तरसंयोगाद्यवच्छि-
न्नक्रियात्वाद्युपाधिरूपे च तत्र स्वरूपतः शक्तिग्रहा-
योगात् सखण्डस्य निरवच्छिन्नप्रकारत्वाभावात् निरुक्त-
क्रियात्वत्वावच्छिन्नशक्तताज्ञानत्वेन हेतुतामपेक्ष्य लघुतया
तादृशक्रियात्वावच्छिन्नशक्तिमत्त्वज्ञानत्वेनैव तथात्वौचित्यात्
गुरुत्वादिप्रयोज्यस्य पतनत्वादेरखण्डत्वे पत्यादिधातूना-
न्तत्र शक्तत्वेऽपि क्षत्यभावाच्च पश्वादिपदानामपि लोमव-
ल्लाङ्गूलादिपर्य्यवसिते पशुत्वादिमात्रे न शक्तिस्तत्र वृत्ति-
ग्रहोत्तरं तन्मात्रस्यैवानुभवेन तदाश्रयस्यालाभात्
लोमादीनां स्वाश्रयतुल्यवित्तिवेद्यत्वस्य लोमवल्लाङ्गूल-
वान् देश इत्यनुभवे व्यभिचारादिति प्राहुः"
तत्र परिभाषिकी औपाधिकी च तत्रैव लक्षिता यथा
"उभयावृत्तिधर्म्मेण संज्ञा स्यात् परिभाषिकी । औपा-
धिकी त्वनुगतोपाधिना या प्रवर्त्तते । उभयावृत्तिधर्मा-
वच्छिन्नसङ्केतवती संज्ञा पारिभाषिकी यथाकाशडित्यादिः
सा हि द्वितीयावृत्तिनैव शब्दादिना रूपेण तदाश्रय-
मभिधत्ते नचाकाशादिपदस्य गगनादौ निरवच्छिन्नैव
शक्तिः पटादिपदस्यापि पटादौ तादृशशक्त्यापत्तेः पटे
शक्तमपि पटपदं न पटत्वावच्छिन्ने शक्तिमदित्यादिग्रहोत्तरं
ततः पटत्वविशिष्टस्याननुभवादवश्यं तच्छक्तिरवच्छिन्नेति
चेत् शब्दवति शक्तमप्याकाशपदं न शब्दवत्त्वावच्छिन्न-
शक्तिमदित्येवं ग्रहदशायामाकाशादिपदान्न शब्दवत्त्वेन
गगनस्य प्रतीतिरतस्तस्यापि शब्दवत्त्वावच्छिन्नैव तत्र
शक्तिरिति विभाव्यताम् । एतेन पटत्वाद्युपलक्षिते
धर्म्मिण्येव शक्तिग्रहस्य ताद्रूप्येण पटाद्यनुभवं प्रति
हेतुत्वान्मास्तु पटादिपदस्यापि पटत्वाद्यवच्छिन्ने शक्तिः ।
परन्तु पटत्वाद्युपलक्षितव्यक्तिष्वेवेति शिरोमण्युक्तमपि
प्रत्युक्तं शब्दोपलक्षिते धर्मिणि शक्तिग्रहादेवाकाशादि-
पदात्तदंशे निर्व्विकल्पकात्मकस्मरणमन्वयानुभवश्चोत्पद्यत
इति तु नानुभविकं न वा यौक्तिकम् । या चानुगतो-
पाध्यवच्छिन्नसङ्केतवती संज्ञा सा त्वौपाधिकी यथा
भूतद्रूतादिः सा हि सचेतनावृत्तिविशेषगुणवत्त्ववार्त्ता-
हारकत्वाद्यनुगतोपाधिपुरस्कारेणैव प्रवर्त्तते शब्दादिस्तु
सखण्डत्वेनोपाधिरपि नानुगतोद्वितीयावृत्तित्वादतः पारि-
भाषिके गगनादिपदे नातिप्रसङ्गः । घटत्वादेः संस्था-
नवृत्तित्वमते यदि घटादिपदं विलक्षणसंस्थानवत्त्वेन शक्तं
तदौपाधिकमेव यदि च परम्परया वैलक्षण्यवत्त्वेन । तदा
नैमित्तिकमेव । वस्तुतः सामान्यस्य शाब्दबुद्धौ स्वरूपतः